# Rajasvala Stotram

# રજસ્વલા સ્તોત્રમ્

## Document Information

Text title : Rajasvala Stotram

File name : rajasvalAstotram.itx

Category : devii, stavarAja, otherforms, devI

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Latest update : March 10, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 10, 2024

*sanskritdocuments.org*

# રજસ્વલા સ્તોત્રમ્

શ્રી ગણેશામ્બિકાભ્યાં નમઃ ॥

અસ્ય શ્રીરજસ્વલાસ્તોત્રમન્ત્રસ્ય ઈશ્વરઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । રજસ્વલા દેવતા । હક્લીં બીજમ્ ।
હક્લૌં શક્તિઃ । હક્લઃ કીલકમ્ ।
મમોપાસનાર્થે જપે વિનિયોગઃ ॥

અથ ષડઙ્ગઃ ।
ૐ રજસ્વલાયૈ અઙ્ગુષ્ટાભ્યાં હૃદયાય ।
ૐ હક્લીં તર્જનીભ્યાં શિરસે સ્વાહા ।
ૐ હક્લૌં મધ્યમાભ્યાં શિખાયૈ વષટ્ ।
ૐ હક્લઃ અનામિકાભ્યાં કવચાય હુમ્ ।
ૐ રજસ્વલાયૈ નમઃ કનિષ્ઠિકાભ્યાં નેત્રત્રયા વૌષટ્ ।
ૐ રજસ્વલાયૈ હક્લીં હક્લૌં કરતલકરપૃષ્ઠાભ્યાં અસ્ત્રાય ફટ્ ।
અથ ધ્યાનમ્ ।
બાલાર્કકોટિલાવણ્યાં ભાલચન્દ્રનિભાનનામ્ ।
અનન્તબાણસહિતાં ધ્યાયેદ્દેવિરજસ્વલામ્ ॥

માનસૈઃ સમ્પૂજ્ય ।
અથમનુઃ-
॥ ૐ હ્રાં રજસ્વલા હું હું હક્લૌં હક્લૈં હક્લઃ રજસ્વલાયૈ નમઃ ઇતિ મનુઃ ॥

ભગોદેવં જગદ્સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
સત્યપાતાલલોચનઞ્ચ સત્યકાશોભવોદ્ભવમ્ ॥ ૧॥

કમલં ચ ભગાકારં વિરઞ્ચી કમલોદ્ભવમ્ ।
તસ્માત્ભગમાયોતિ સૃષ્ટિસ્થિતિલયાત્મકા ॥ ૨॥

ભગવાન્ ભગરૂપશ્ચ નૌમ્યહં ભગદેવતામ્ ।

ચતુરસિતિલક્ષાનાં જીવયોનિસમુદ્ભવઃ ॥ ૩॥

ભગલિઙ્ગાત્મકં રૂપં પ્રદર્શ્યૈ સચરાચરમ્ ।
નિન્દત્યે નરકં યાન્તિ કલ્પકોટી ન સંશયઃ ॥ ૪॥

યદિ ભાગ્યવશોદ્રષ્ટં પુષ્ટીભુતં ભગં શિવઃ ।
દર્શયાત્ફલમાપ્નોતિ શ◌ૃણુ એવાત્મનોપ્રિયે ॥ ૫॥

ગજાશ્વરથદાનઞ્ચ ગૃહણેદત્ત્યતે ફલમ્ ।
રૂપ્યશ્રવણં તુલાદિનામ લક્ષકોટિગુણમ્ફલમ્ ॥ ૬॥

ભગલિઙ્ગાર્ચનં કૃત્વા એકાન્તે નિશ્ચલવ્રતે ।
સ્વર્ગપાતાલભૂર્લોકે પુજનં ફલમાપ્નુયાત્ ॥ ૭॥

ભગન્દૃષ્ટ્વા જપઙ્કૃત્વા સ્વલ્પમાત્રં ચ કોટિધા ।
પૂજયોત્વા વન્દિત્વાજપાન્તે ચ પુનઃપુનઃ ॥ ૮॥

તે ધન્યં સર્વલોકેષુ પુનર્જન્મ ન લભ્યતે ।
તરન્તિ તારયન્તિ ચ નિર્ભયો યત્રકુત્રચિત્ ॥ ૯॥

રૂપયૌવનલાવણ્યાં પોડશબ્દન્તુ સુન્દરી ।
રજો દૃષ્ટ્વા ભગં દૃષ્ટ્વા નમસ્કૃત્વા ચ ચન્દ્રવત્ ॥ ૧૦॥

સંસિદ્ધી પૂજયિત્વા ચ ધ્યાત્વા નત્વા પુનઃપુનઃ ।
તરં તે તારયન્તિ ચ નૌકાવનં નવકાર્ણવાત્ ॥ ૧૧॥

એકકાલં દ્વિકાલં વા ત્રીકાલં મધ્યરાત્રિ કે ।
એકાન્તે નિશ્ચલસ્થાને પૂજયિત્વા પઠન્તિ ચ ॥ ૧૨॥

અનેકકોટીવિઘ્નાનાન્નાશયેત્ નાત્ર સંશયઃ ।
અનન્તફલમવાપ્નોતિ મમવાક્યે ચ પાર્વતી ॥ ૧૩॥

ગુરૂદેવાત્મના નેક્યં ભાવિત્વા જપન્તિ ચ ।
તત્સર્વં ફલં યન્યથા ન ચ સિધ્યતે ॥ ૧૪॥

સપ્તકોટી મહામન્ત્રે સાવર્ણા સગુણાન્વીતા ।
સર્વેપ્રશ્નમાયાન્તિ ક્રોધદ્રોહાદિકં ત્યજેત્ ॥ ૧૫॥

રજસ્વલામાહાસ્તોત્રં પઠ્યતે પ્રત્યહં સદા ।
જપાર્ચનાદિહોમેન પ્રયોગેન ચ સિદ્ધિદમ્ ॥ ૧૬॥

જપહોમાર્ચન કૃત્વા વિધિયુક્તં વરાનને ।
રજસ્વલા વિનાસ્તોત્રં ન ચ સિધ્યન્તિ ભૂતલે ॥ ૧૭॥

સર્વેશાક્તમહામન્ત્ર શક્તિ ઉત્કીલનં તથા ।
એતત્પરમં શ્રેષ્ઠં શાક્તાનાં નાસ્તિ સુન્દરિ ॥ ૧૮॥

મહાબીજન્ત્રયં દેવી રાધ્યતે ચ રજસ્વલા ।
પ્રણવાદિ જપં માત્ર ત્રિબીજં સર્વસિદ્ધિદા ॥ ૧૯॥

એષાં રજસ્વલાવિદ્યા પિતાપુત્રં ન કથ્યતે ।
દામ્ભિકાય કૃતઘ્નાય ગુરુદ્રોહરતાય ચ ॥ ૨૦॥

ઘાતકાય ચ દુષ્ટાય રજસ્વલા ન દીયતે ।
દદ્યાય શાન્તાય શિષ્યાય ગુરુભક્તાય વિશેષતઃ ॥ ૨૧॥

દુર્જનઞ્ચાપિ દુષ્ટાશ્ચ આયુર્ભાગ્યઞ્ચ નશ્યતિ ।

ઇતિ શ્રી ગર્ભકુલાર્ણવે ઈશ્વર પાર્વતીસંવાદે રજસ્વલા સ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રી લલિતામ્બાર્પણમસ્તુ ।

Proofread by rajesh thyagarajan

*Rajasvala Stotram*

pdf was typeset on March 10, 2024

Please send corrections to *sanskrit@cheerful.com*